**अत्याधान** न०अति+आ+धा-ल्युट्। अतिक्रमणे, सम्बन्धमात्रे, उपरिस्थापने च। अत्यये अव्ययी०। आग्न्याधानातिक्रमे अव्य०। अतिक्रम्य ज्येष्ठमाधानम्। ज्येष्ठातिक्रमेण अग्न्याधाने न०।

**अत्याय** पु० अति+अय-घञ्। अतिक्रमे, "प्रजाह तिस्रो "अत्यायमीयुरिति" श्रुतिः। अतिक्रान्तलाभे त्रि०। प्रा०स०। अतिशयिते लाभे पु०।

**अत्यायु** न० अति+आ+या-कु। यज्ञियपात्रभेदे। "मूर्द्धास्यत्यायु पात्रमसीति"ता० "अत्यायुनाम्नाभिधेयमिति" भाष्यम्। [विख्यात्यतिशये अतिप्रसिद्धौ च!

**अत्यारूढि** स्त्री अति+आ+रुह-क्तिन्। आरोहणातिशये।

**अत्याल** पु० अतिशयेन समन्तात् अलति पर्य्याप्नोति अति+आ+अल-अच्। (लालचिता) इति ख्याते रक्तचित्रकवृक्षे, तस्य अत्यल्पकालेन समन्तात् व्यापनात् तत्त्वम्।

**अत्याशा** स्त्री प्रा०स०। अपूरणीयधनादितृष्णायाम्। अत्या०स०। आशातिक्रान्ते त्रि०।

**अत्याश्रम** त्रि०अतिक्रान्त आश्रमान् तद्विहितधर्म्मान् अत्या०स०। सर्व्वाश्रमत्यागिनि पञ्चमाश्रमिणि संन्यासिनि। अत्रात्याश्रमिन् इत्यप्यत्र। अतिशयित आश्रमः प्रा०स०। उत्तमाश्रमे संन्यासे पु०।

**अत्याहित** न० अत्यन्तमाधीयते तन्निवारणार्थं मनो दीयतेऽस्मिन् आ+धा-आधारे क्त। अत्यन्तभीतौ, प्राणहानिशङ्काकरे अनर्थे च। "किमत्रात्याहितमिति" नाटकम्।

**अत्युक्ति** स्त्री अतिशयेन अनौचित्येन वा उक्तिः अति+वच-क्तिन्। अतिशयोक्तौ, अन्याय्योक्तौ, निर्गुणस्य जडस्य वा आरोपितगुणेन स्तवने। "अत्युक्तौ न यदि प्रकुप्यसि मृषावादञ्च नो मन्यसे" इत्युद्भटः।

**अत्युक्ता(क्था)** स्त्री उक्ता(क्था) एकाक्षरपादिका वृत्तिः ताम् अतिक्रान्ता अत्या०स०। द्व्यक्षरपादके छन्दोभेदे। अत्युक्थस्तु उक्थनामकसामभेदातिक्रान्तरि त्रि०।

**अत्युच्छ्रित** त्रि० अत्यन्तमुच्छ्रितः। अत्यन्तोन्नते उन्नतेः परमसीमापन्ने।

**अत्युत्कट** त्रि० अत्यन्त उत्कटः। अत्यन्तोग्रे। "अत्युत्कटैः पापपुण्यैरिहैव फलमश्नुते" इति पुरा०।

**अत्युत्कृष्ट** त्रि० अत्यन्तमुत्कृष्टः। परसीमापन्नोत्कर्षयुते।

**अत्यूमशा** अव्य० ऊर्य्यादिगणोक्ते अनुकरणशब्दे हिंसाद्योतकोऽयमित्यन्ये अत्यूमशाकत्य। गणरत्ने तु अयं न दृश्यते गणपाठे तु दृश्यते इति विवेच्यम्।

**अत्यूह** पु० अतिशयेन ऊहते शब्दायते अति+ऊह-अच्। कालकण्ठे (डेओ) इति प्रसिद्धे दात्यूहे पक्षिणि। अतिशयेन ऊहस्तर्कः प्रा०स०। अतिशयिततर्के। (नील) इति ख्यातौषधौ नीलिकायां स्त्री। अत्ययेऽव्ययी०। वितर्काभावे अव्य०।

**अत्र** अव्य० अस्मिन् एतस्मिन् वा इदम्+एतद्-वा सप्तम्यास्त्रल् प्रकृतेरश्भावश्च। अस्मिन् एतस्मिन् वेत्यर्थे। "कोऽत्र भूमिवलये जनान् सुधेति" माघः। न त्रायते केनापि त्रै-बा० कर्म्मणि क। अन्यत्राणायोग्ये क्षत्रिये "प्राणाः क्षणितोः प्रक्षत्रमत्रमाप्नोतीति" यश्च न त्रायते केनचिदत्र' क्षत्रं प्राप्नोत्यर्थः।

**अत्रप** त्रि० नास्ति त्रपा यस्य। निर्लज्जे।

**अत्रभवत्** त्रि० अयमित्यर्थे अत्र "अन्येभ्योऽपीति" प्रथमार्थे त्रल् ततः कर्म्म०। पूज्ये, "जयमत्रभवान्नूनमरातिष्वभिलाषुक" इति भार०।

**अत्रस्त** त्रि० न त्रस्तः। त्रासरहिते त्रासोपाधिरहिते च "जुगोपात्मानमत्रस्त" इति रघुः। त्रासोपाधिमन्तरेणेत्यर्थः मल्लिनाथः। [त्रासशून्ये त्रि०।

**अत्रास** पु० न त्रासः अभावार्थे न०त०। त्रासाभावे न०ब०।

**अत्रि(त्रि)** पु० अद-त्रिन् "मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः। ब्रह्मणोमानसाः पुत्रा वशिष्ठश्चेति सप्त ते" इत्युक्ते सप्तर्षिमध्ये मुनिभेदे। "अत्रिरत्रिं घर्म उरुष्यदन्त इति श्रुतिः"। अत्र पक्षे वा तलोपे अत्रिरित्यपि। त्रिभिन्ने त्रि० बहुवचनान्तः। अस्य उत्तरदिशि तारारूपेणापि स्थितिः वृहत्संहितायामुक्ता यथा "एकावलीव राजति ससितोत्पलमालिनी सहासेव। नाथवतीव च दिव्यैः कौवेरी सप्तभिर्मुनिभिः॥ ध्रुवनायकोपदेशान्नरीनर्त्तीवोत्तरा भ्रमद्भिश्च। यैश्चारमहं तेषां कथयिष्ये वृद्धगर्गमतात्॥ आसन्मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ। षड्द्विकपञ्चद्वियुतः शककालस्तस्य राजस्य॥ एकैकस्मिन्नृक्षे शतं शतं ते चरन्ति वर्षाणाम्। प्रागुत्तरतश्चैते सदोदयन्ते ससाध्वीकाः॥ पूर्वे भागे भगवान् मरीचिरपरे स्थितो वशिष्ठोऽस्मात्। तस्याङ्गिरास्ततोऽत्रिस्तस्यासन्नः पुलस्त्यश्च॥ पुलहः क्रतुरिति भगवानासन्नानुक्रमेण पूर्व्वाद्याः। तत्र वशिष्ठं मुनिवरमुपाश्रितारुन्धती साध्वी॥ उल्काशनिधूमाद्यैर्हता विवर्णा विरश्मयो ह्रस्वाः। हन्युः स्वं स्वं वर्गं विपुलाः स्निग्धाश्च तद्वृद्ध्यै" इति॥ अत्रेर्वर्गाश्च तत्रैवोक्ता यथा